CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीः

वेदान्तसंज्ञाप्रकरणम्

प० परमहंसपरिव्राजकस्वामिश्रीआदित्यपुरी
निर्मितप्रदीपिकाव्याख्यासहितम्

तच्च.

श्रोत्रियब्रह्मनिष्ठस्वामिश्रीधनराजगिरि-
सम्मत्या.

सारणपुर निवासि श्रेष्ठ श्री भाणकचंद पौत्र
जगन्नाथ जयनारायण फकीरचन्द खेमका
इत्यनेन.

मुकुन्दात्मज ज्येष्ठाराम शर्मणः
पुस्तकालय द्वारा
मोहमय्यां

गुजराती यंत्रालये मुद्रापितम्
शकाब्दाः १८२३ विक्रमाब्दाः १९५८
मूल्यं आणकचतुष्टयम्

(कोपीराईट्)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ॐ

वेदान्तसंज्ञाप्रकरणम् ।

श्रीगणेशाय नमः ॥ नत्वा श्रीकृष्णदत्ताख्यरेवातीर्थमु-
नीश्वरौ ॥ संज्ञाग्रन्थस्य चास्यैव क्रियते पददीपिका ॥ १ ॥
मङ्गलं दिशतु मे विनायको मङ्गलं दिशतु मे सरस्वती ॥
मङ्गलं दिशतु मे महेश्वरो मङ्गलं दिशतु मे महेश्वरी ॥ २ ॥

श्रीः ॥ गणेशं गाङ्गेयं गिरमथ गुरुं बोधजनकं
गिरीशं गोविन्दं प्रणतजनतापोपशमकम् ॥
रमां गौरीं गङ्गां सपदि हृदि नत्वा स्वमतये
श्रुतिप्रोक्ताः संज्ञाः परममतिदाश्चोपकलये ॥ १ ॥

चिकीर्षितग्रन्थपरिसमाप्त्यर्थमिष्टदेवतानमस्कार-
लक्षणं मङ्गलं निबध्नंश्चिकीर्षितं प्रतिजानीते ॥ गणे-
शमिति ॥ गणेशादीन् हृदि नत्वा स्वमतये स्वरूप-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ज्ञानाय संज्ञा उपकलय इत्यन्वयः ॥ परममतिद मोक्षसाधनमतिदा इत्यर्थः ॥ बहुदेवनमस्कारकर बहुविघ्नशङ्कयेति भावः ॥ १ ॥

अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते ॥
इति वृद्धवचो मत्वा संज्ञाग्रन्थः प्रवर्त्तितः ॥ २ ॥

नन्वद्वैतवादे संज्ञोपकलनं न संभवति । संज्ञा संज्ञीति व्यवहारस्य भेदगर्भितत्वादित्यत आह ॥अध्यारोपेति॥ संज्ञाग्रन्थः वेदान्तसंज्ञाग्रन्थ प्रवर्त्तितः प्रवृत्तिविषयी कृतः भवतीति शेषः ॥ २ ॥

अवस्तुविषया बुद्धिरध्यारोपणमुच्यते ॥
यथार्थविषया बुद्धिरपवादोऽभिधीयते ॥ ३ ॥

ननु कौ तावध्यारोपापवादावित्याकाङ्क्षाया माह॥अवस्तुविषयेति ॥ नन्वध्यारोपणस्य भ्रमरूपत या संस्कारजन्यत्वात्संस्कारस्य चानादित्वात्तद्विषयः संसारः सत्यः स्यादित्यत आह ॥ यथार्थेति ॥ अवस्तुविषयकज्ञानस्यापि संस्कारजनकत्वान्न संस्कारविषयः सत्यः ॥ अन्धेनैव नीयमाना यथान्धा इति श्रुतेरिति भावः ॥ ३ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रपञ्चो द्विविधः प्रोक्तो ह्यज्ञानं द्विविधं स्मृतम्॥
शरीरं द्विविधं सूक्ष्मं स्थूलं प्रोक्तं द्विधैव हि॥४॥

अथ षट्त्रिंशच्छ्लोकैः संज्ञाः दर्शयति ॥ प्रपञ्चो द्विविध इत्यादिना--तदाद्यास्त्रय एव हीत्यन्तेन ॥ स्थूलसूक्ष्मकारणप्रपञ्चानां समष्टि-र्महाप्रपञ्चो बाह्यप्रपञ्च आन्तरप्रपञ्च इति प्रपञ्चो द्विविधः॥ देहाद्बहिर्वर्त्तमानो बाह्यप्रपञ्चः—देहान्तर्वर्त्तमान आन्तरप्रपञ्च इत्यर्थः ॥ समष्ट्यज्ञानं व्यष्ट्यज्ञानमित्यज्ञानं—द्विविधम् ॥ अज्ञानस्य समष्ट्यभिप्रायेणैकत्व-व्यपदेशः।व्यष्ट्यभिप्रायेण नानात्वव्यपदेशः।समष्ट्य-ज्ञानमीश्वरोपाधिः व्यष्ट्यज्ञानं जीवोपाधिरिति विवेकः॥समष्टिसूक्ष्मशरीरं व्यष्टिसूक्ष्मशरीरमितिसूक्ष्म-शरीरं द्विविधम् ॥ समष्टिस्थूलशरीरं व्यष्टिस्थूलश-रीरमिति स्थूलशरीरं च । द्विधे त्यर्थः ॥ ४ ॥

शक्तिद्वयं च विख्यातं तथा निःश्रेयसद्वयम् ॥
संशयश्च द्विधा प्रोक्तो द्विधाऽसंभावना तथा५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आवरणशक्तिर्विक्षेपशक्तिरिति शक्तिद्वयम् ॥ अन्तर्दृग्दृश्ययोर्भेदं बहिश्च ब्रह्मसर्गयोर्भेदं वा स्वात्मविलोकयितृबुद्धिमखण्डसच्चिदानन्दस्वरूपं चावृणोतीति-आवरणशक्तिः—विविधस्वरूपेण भवनं विक्षेपशक्तिः—रित्यवं शक्तिः—द्विधेत्यर्थः ॥ अनर्थनिवृत्तिरानन्दावाप्तिश्चेति निःश्रेयसद्वयम् ॥ प्रमाणगतसंशयः प्रमेयगतसंशयश्चेति संशयो द्विधा ॥ श्रुतिभिः कर्म बोध्यते उत शुद्धं ब्रह्म प्रतिपाद्यते इत्येवंरूपा चित्तवृत्तिः-प्रमाणगतसंशयः ॥ ब्रह्म जगत्कारणमुत प्रधानादिकमित्येवंरूपा चित्तवृत्तिः-प्रमेयगतसंशयः ॥ प्रमाणगताऽसंभावना प्रमेयगतासंभावनेत्यसंभावना द्विधा ॥ ब्रह्मणः । सिद्धत्वात्पृथिव्यादिवत्प्रमाणान्तरगम्यत्वेन श्रुतिः सिद्धब्रह्मप्रतिपादिका कथं भवेत्फलाभावान्न भवत्येवेति निश्चयात्मिका चित्तवृत्तिः- प्रमाणगतासंभावना ॥ ब्रह्मणो जगद्विलक्षणत्वेन स्थितत्वाज्जगत्कारणत्वं कथं संभवति न संभवत्येवेति निश्चयात्मिका चित्तवृत्तिः-प्रमेयगतासंभावनेत्यर्थः ॥ ५ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अन्यथाभावना प्रोक्ता द्विधा वेदान्तदर्शिभिः॥
प्रज्ञाद्वयं समाख्यातं समाधिद्वयमेव हि ॥ ६ ॥

अन्यथाभावना विपरीतभावना ॥प्रमाणगतविपरीत भावना प्रमेयगतविपरीतभावनेति विपरीतभावना द्विधा ॥ ब्रह्मणः सिद्धत्वेन श्रुतीनां तत्प्रतिपादकत्वे निष्फलत्वप्रसङ्गाच्छ्रुतयः कर्मपरा एवेति निश्चयः प्रमेयगतविपरीतभावना॥तन्तुपटयोः कार्यकारणयोः सारूप्यं दृश्यते॥अतो जगद्ब्रह्मणोः सारूप्याभावाज्ज-गत्कारणं प्रधानादिकमेवेति निश्चयः प्रमेयगतविपरीतभावनेत्यर्थः ॥स्थितप्रज्ञाऽस्थितप्रज्ञेति प्रज्ञाद्वयम्॥ संम्प्रज्ञातसमाधिरसम्प्रज्ञातसमाधिश्चेति समाधि-द्वयम् ॥ ६ ॥

ब्रह्मजीवशरीराण्यप्यवस्थाकरणे तथा ॥
कर्म चैतानि सर्वाणि त्रिविधानि स्मृतानि वै॥७॥

ब्रह्मादिकर्मान्तानि षट् प्रत्येकं त्रिविधानीत्यर्थः ॥ एकमेवाद्वितीयं ब्रह्म समष्टिस्थूलसूक्ष्मकारणशरीरो-पाधितया-विराड् हिरण्यगर्भ ईश्वर इति चोच्यते ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एतेषामेव-ब्रह्मत्रयमिति संज्ञा ॥ एक एव प्रत्यगात्मा व्यष्टिस्थूलसूक्ष्मकारणशरीरोपाधिकत्वेन विश्वस्तैजसः प्राज्ञ इति च व्यपदिश्यते ॥ एतेषामेव जीवत्रयमिति संज्ञा ॥ शरीरं त्रिविधं स्थूलसूक्ष्मकारण भेदादित्यर्थः ॥ अवस्था त्रिविधा जाग्रत्स्वप्नसुषुप्तिभेदादित्यर्थः॥करणं त्रिविधं मनोवाक्कायभेदादित्यर्थः। कर्म त्रिविधं पुण्यपापविमिश्रभेदादित्यर्थः ॥ ७ ॥

पुण्यं पापं विमिश्रं यत्तत्प्रत्येकं त्रिधा मतम् ॥
प्रारब्धं त्रिविधं प्रोक्तं प्रतिबन्धत्रयं तथा ॥ ८॥

पुण्यं कर्म त्रिधा पुण्योत्कर्षपुण्यमध्यमपुण्यसामान्यभेदात्। पुण्योत्कर्षरूपकर्मणो हिरण्यगर्भशरीरप्राप्तिःफलम्॥ पुण्यमध्यमरूपकर्मणः इन्द्रादिशरीरप्राप्तिःफलम्।पुण्यसामान्यरूपकर्मणो यक्षरक्षआदि शरीरप्राप्तिः फलम्॥पापं कर्म त्रिधा पापोत्कर्षपापमध्यमपापसामान्यभेदात् ॥ पापोत्कर्षस्य परतापकरगुच्छगुल्मवृश्चिकवनमक्षिकादिशरीरप्राप्तिः फलम् ॥ पापमध्यमस्याम्रपनसनारिकेलमहिष्यश्वगर्दभादि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शरीरप्राप्तिः फलम् ॥ पापसामान्यस्य गोगजाश्वत्थतुलस्यादिशरीरप्राप्तिः फलम्॥ मिश्रंकर्म त्रिधा मिश्रोत्कर्षमिश्रमध्यममिश्रसामान्यभेदात् ॥ मिश्रोत्कर्षस्य निष्कामकर्मानुष्ठानादिनिर्विकल्पकसमाधिपर्यंतयोग्यशरीरप्राप्तिः फलम् ॥ मिश्रमध्यमस्य स्वाश्रमेचितकाम्यकर्मयोग्यशरीरप्राप्तिः फलम् ॥ मिश्रसामान्यस्य चण्डालव्याधादिशरीरप्राप्तिः फलम् ॥ प्रारब्धं त्रिविधं स्वेच्छाकृत परेच्छाकृतानिच्छाकृतभेदात् ॥ तत्र स्वेच्छाकृतं भिक्षाटनादिसमाध्यवस्थायां शिष्यादिभिर्दीयमानमन्नादिकम् परेच्छाकृतम् आकाशफलवदकस्माज्जायमानम्॥ पाषाणपतनादिकमनिच्छाकृतमिति ॥ भूतप्रतिबन्धो वर्त्तमानप्रतिबन्ध आगामिप्रतिबन्धश्चेति ज्ञानप्रतिबन्धत्रयम् ॥ श्रवणादिकाले पूर्वानुभूतस्मरणं भूतप्रतिबन्धः ॥ प्रज्ञामान्द्यादिर्वर्त्तमानप्रतिबन्धः ॥ प्रारब्धशेष आगामिप्रतिबन्धः इति विवेकः ॥ ८ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सम्बन्धस्त्रिविधो ज्ञेयस्त्रिविधस्ताप एव हि ॥
अधिभूतादिकं त्रेधा कारणं त्रिविधं मतम् ॥९॥

संयोगः समवायः आध्यात्मिकतादात्म्यसम्बन्ध इति सम्बन्धस्त्रिविधः॥यद्वा कार्यकारणभावो विषय विषयिभावः आधाराधेयभावश्चेतिसम्बन्धस्त्रिविधः। यद्वा पदयोः समानाधिकरण्यं पदार्थयोर्विशेषणविशेष्यभावः प्रत्यगात्मपदार्थयोर्लक्ष्यलक्षणभावश्चेति सम्बन्धस्त्रिविधः ॥ आध्यात्मिकमाधिभौतिकमाधिदैविकं चेति तापस्त्रिविधः॥ अधिभूतादिकमिति॥ अस्याध्यात्मादिकमित्यर्थः॥ अध्यात्ममधिभूतमधिदैवतमित्यध्यात्मादिकं त्रेधेत्यर्थः॥ आरम्भः परिणामो विवर्त्तश्चेति कारणं त्रिविधम् ॥ ९ ॥

त्रयो गुणास्त्रयः कलास्तिस्र एव हि मूर्त्तयः॥
त्रयो ज्ञात्रादयो लोके प्रपञ्चस्त्रिविधो मतः॥१०॥

सत्त्वरजस्तमांसीति त्रयो गुणाः॥भूतभविष्यद्वर्त्तमानास्त्रयः कालाः ॥ ब्रह्माविष्णुमहेश्वरास्तिस्रो मूर्तयः ॥ ज्ञाता ज्ञानं ज्ञेयमिति ज्ञात्रादयस्त्रयः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एतदेव त्रिपुटीत्युच्यते ॥ स्थूलप्रपञ्चः सूक्ष्मप्रपञ्चः कारणप्रपञ्चश्चेति प्रपंञ्चस्त्रिविधः ॥ १० ॥

लोकत्रयं तथा ज्ञानप्रतिबन्धत्रयं स्मृतम् ॥
वासनात्रितयं लोके श्रवणादित्रयं मतम् ॥११॥

पातालमर्त्यस्वर्गा इति लोकत्रयम् ॥ एतदेव जगत्त्रयमिति चोच्यते ॥ संशयोसंभावना विपरीतभावनेति ज्ञानप्रतिबन्धत्रयम् ॥ लोकवासना देहवासना शास्त्रवासनेति वासनात्रयम् ॥ श्रवणमनननिदिध्यासनानीति श्रवणादित्रयम् ॥ सर्वसंशयनिवर्त्तकं श्रवणम् ॥ असंभावनानिवर्त्तकं मननम् ॥ विपरीतभावनानिवर्त्तकं निदिध्यासनमिति विवेकः ॥ ११ ॥

ज्ञानादित्रितयं ज्ञेयं तथा हेत्वादयस्त्रिधा ॥
प्राणायामत्रयं लोके चान्ध्यादित्रयमेव हि ।१२।

ज्ञानं वैराग्यमुपरतिश्चेति ज्ञानादित्रितयम् ॥ तथा ज्ञानस्य हेतुः श्रवणादिः ॥ तत्त्वमिथ्याभेदनिश्चयो ज्ञानस्य स्वरूपम् ॥ अनात्मस्वात्मबुद्ध्यभावो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ज्ञानस्य कार्यम् ॥ वैराग्यस्य हेतुर्विषयेषु दोषदृष्टिः ॥ वान्ताशनवद्धेयता बुद्धिः स्वरूपम् ॥ पुनराशाभावः कार्यम् ॥ उपरतेर्हेतुर्यमनियमादि ॥ चित्तनिरोधः स्वरूपम् ॥ सर्वव्यवहारनाशः कार्यमिति ज्ञानवैराग्योपरतीनां हेतुस्वरूपकार्याणि त्रिधा ज्ञेयानीत्यर्थः॥ प्राणनिग्रहोपाया रेचकपूरककुंभका इति प्राणायामत्रयम् ॥ नेत्रधर्माःआध्यमान्द्यापटुत्वानीत्यान्ध्यादित्रयम् ॥ १२ ॥

तादात्म्यं चैषणा त्रेधा सुषुप्त्यादित्रयं भवेत् ॥
वर्त्तमानं स्मृतं ज्ञाने प्रतिबन्धचतुष्टयम्॥ १३ ॥

सहजतादात्म्यं कर्मजतादात्म्यं भ्रान्तिजन्यतादात्म्यमिति तादात्म्यं त्रेधा—क्रमेणाहङ्कारस्य चिच्छायादे हसाक्षिभिस्तादात्म्यमित्यर्थः ॥ पुत्रैषणा वित्तैषणालोकैषणा चेत्येषणा त्रेधा॥सुषुप्तिमूर्च्छासमाधय इति सुषुप्त्यादित्रयम् ॥ विषयाशक्तिः—प्रज्ञामान्द्यं कुतर्को विपर्ययो दुर्ग्रहश्चेति ज्ञानेवर्त्तमानं प्रतिबन्धचतुष्टयम् ॥ १३ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पुरुषार्थश्च शब्दस्य प्रवृत्तौ यन्निमित्तकम् ॥
वर्णास्तथाश्रमास्ते च प्रत्येकंःस्युश्चतुर्विधाः१४।

पुरुषार्थशब्दप्रवृत्तिनिमित्तवर्णाश्रमाश्चत्वारः प्रत्येकं चतुर्विधाः स्युरित्यर्थः ॥ धर्मार्थकाममोक्षा इति पुरुषार्थश्चतुर्विधः ॥ जातिगुणाक्रियासम्बन्धा इति शब्दप्रवृत्तिनिमित्तं चतुर्विधम् ॥ ब्रह्मक्षत्रियवैश्य शूद्रा इति वर्णाश्चतुर्विधाः ॥ ब्रह्मचर्याश्रमगृहस्थाश्रमवानप्रस्थाश्रमसंन्यासाश्रमा इत्याश्रमाश्चतुर्विधा इति ॥ १४ ॥

साधनानि च चत्वार्येवानुबन्धचतुष्टयम् ॥
अन्तःकरणं च तद्वत्संकल्पादिचतुष्टयम्॥१५॥

नित्यानित्यवस्तुविवेकः इहामुत्रार्थफलभोगविरागः शमादिषट्कसंपत्तिर्मुमुक्षुत्वं चेति चत्वार्येव साधनानीत्यर्थः ॥ विषयप्रयोजनसम्बधाधिकारिण इत्यनुबन्धचतुष्टयम् ॥ जीवब्रह्मैक्यं विषयः॥ स्वरूप प्राप्तिः प्रयोजनम् ॥ बोध्यबोधकभावः सम्बन्धः॥ साधनचतुष्टयसंपन्नोधिकारीति ॥ मनोबुद्ध्यहङ्कार चित्तानीत्यन्तःकरणचतुष्टयम् ॥ संकल्पाध्यवसाया

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भिमानानुसन्धानानीति संकल्पादिचतुष्टयम्॥१५॥

वेदाश्चत्वार एवात्र प्रमाणानि तथैव हि ॥
समाधिनाशकं प्रोक्तं विघ्नानां हि चतुष्टयम्१६॥

ऋग्यजुःसामाथर्वण इति वेदाश्चत्वार एव ॥ प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि तथैव चत्वार्येव॥ लयविक्षेपकषायरसास्वादा इति समाधिनाशकविघ्न चतुष्टयम् ॥ चित्तवृत्तेर्निद्रा लयः ॥ अन्यावलम्बनं विक्षेपः॥चित्तवृत्तेः स्तब्धीभावः कषायः॥समाध्यारम्भसमये सविकल्पानन्दास्वादनं रसास्वाद इति१६

चतुर्विधं हि मैत्र्यादि भूतग्रामश्चतुर्विधः ॥
चतुष्टयं तथा ब्रह्मविदादीनां प्रकीर्त्तितम्॥१७ ॥

मैत्रीकरुणामुदितोपेक्षा इति मैत्र्यादिचतुष्टयम् ॥ जरायुजाण्डजस्वेदजोद्भिज्जानीति भूतग्रामश्चतुर्विधः ॥ ब्रह्मविद्वरवरीयोवरिष्ठा इति ब्रह्मविदादीनां चतुष्टयं प्रकीर्तितम् ॥ तदर्थश्चाग्रेस्फुटी भविष्यति१७

कोशाः पञ्च समाख्यातास्तथा ज्ञानेंद्रियाणि हि॥
शब्दादयश्च पञ्चैव तथा कर्मेन्द्रियाणि च ॥१८॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अन्नमयः प्राणमयो मनोमयो विज्ञानमय आनन्दमय इति पञ्चकोशाः ॥ श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणा नीति पञ्च ज्ञानेन्द्रियाणि ॥ शब्दस्पर्शरूपरसगन्धा इति पञ्च शब्दादयः ॥ वाक्पाणिपादपायूपस्था इति पञ्च कर्मेन्द्रियाणि ॥भवन्तीति शेषः सर्वत्र ॥ १८ ॥

वचनादीनि पञ्चैव प्राणाद्या वायवस्तथा ॥
पञ्चोपवायवो देहे कर्म पञ्चविधं स्मृतम् ॥ १९ ॥

वचनादानगमनविसर्गानन्दा इति वचनादीनि पञ्च॥ प्राणापानव्यानोदानसमाना इति प्राणाद्याः पञ्च वायवः॥नागकूर्मकृकरदेवदत्तधनञ्जया इति पञ्चोप वायवः ॥ नित्यनैमित्तिकप्रायश्चित्तकाम्यनिषिद्धा नीति कर्म पञ्चविधम्॥नित्यान्यकरणेप्रत्यवायसाध-नानि संध्यावन्दनादीनि ॥ नैमित्तिकानि पुत्रजन्मा-द्यनुबन्धीनि जातेष्ट्यादीनि॥प्रायश्चित्तानि पापक्षय-साधनानि कृच्छ्रचान्द्रायणादीनि॥काम्यानि स्वर्गा-दीष्टसाधनानि ज्योतिष्टोमादीनि । निषिद्धानि नर-काद्यनिष्टसाधनानि ब्रह्महत्यादीनीति विवेकः ॥१९॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सूक्ष्मभूतानि पञ्चैव तथा स्थूलानि पञ्चधा॥
यमाः पञ्च समाख्याताः पञ्चैव नियमास्तथा २०

शब्दतन्मात्रस्पर्शतन्मात्ररूपतन्मात्ररसतन्मात्रगन्धतन्मात्राणीति सूक्ष्मभूतानि पञ्च ॥ पञ्चीकृतानि पृथिव्यप्तेजोवाय्वाकाशानीति पञ्चधास्थूल भूतानि॥अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा इति यमाः पञ्च ॥ शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानीति पञ्चैव नियमाः इत्यर्थः ॥ २० ॥

भूमिकाः प्रलयास्तद्वद्भ्रमा वै तन्निवर्त्तकाः ॥
दृष्टान्तास्ते च दृष्टान्ताः प्रत्येकं पञ्चधा मताः २१

भूमिकाप्रलयभ्रमतन्निवर्त्तकदृष्टान्तदृष्टान्तास्ते पञ्च प्रत्येकं पञ्चधेत्यर्थः॥ क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति भूमिकाः पञ्च ॥ लोकादिवासनासु वर्त्तमानं चित्तं क्षिप्तभूमिका ॥ निद्रातन्द्राग्रस्तं चित्तं मूढभूमिका॥कदाचिद्ध्यानयुक्तं चित्तं क्षिप्ताद्विशिष्टतया विक्षिप्तभूमिका ॥ तत्र क्षिप्तमूढयोः समाधित्वशङ्कैव नास्ति ॥ विक्षिप्ते तु सामाधित्वशङ्का ॥ तदितरद्भूमि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्वयं समाधिः ॥ एकाग्रे मनसि सद्भूतमर्थं प्रद्योतयति क्षिणोति च क्लेशान्कर्मबन्धनानि श्लथयति निरोधमभिमुखीकरोतीतिसंप्रज्ञाताख्यो योग एकाग्रभूमिका सर्ववृत्तिनिरोधरूपाऽसंप्रज्ञातः समाधिर्निरुद्धभूमिकेति॥नित्यप्रलय अवान्तरप्रलयो दैनन्दिनप्रलयो ब्रह्मप्रलय आत्यन्तिकप्रलयश्चेति प्रलयाः पञ्च॥प्राणिनां सुषुप्तिर्नित्यप्रलयः॥ब्रह्मणः एकस्मिन्नहनि चतुर्दशमनूनां चतुर्दशेन्द्राणां चाधिपत्यमेकस्यापगतेन्यस्य प्राप्ते सत्याधिपत्यानुकूलपर्यन्ते तस्मिन्समये चतुर्दशावान्तरप्रलयाः॥ब्रह्मणः सुषुप्तिर्दैनन्दिनप्रलयः॥ ब्रह्मणो नाशावस्था ब्रह्मप्रलयः ॥ मुक्त्यवस्थाऽऽत्यन्तिकः प्रलयः॥(१) जीवात्मापरमेश्वराद्भिन्नः(२) आत्मनि प्रतीयमानं कर्तृत्वादि वास्तवं (३)--शरीरत्रयावच्छिन्नात्मा सङ्गी ॥३॥ जगत्कारणत्वेन ब्रह्मणो विकारित्वं (४) कारणाद्भिन्नस्य प्रपञ्चस्य सत्यत्वमिति भ्रमाः पञ्च ॥ बिम्बप्रतिबिम्बदृष्टान्तेन प्रथमभ्रमो निवर्त्तनीयः ॥ स्फटिकलौहित्यदृष्टान्तेन द्वितीयभ्रमो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निवर्त्तनीयः ॥ घटमठाकाशदृष्टान्तेन तृतीयभ्रमो निवर्त्तनीयः॥रज्जुसर्पदृष्टान्तेन चतुर्थभ्रमो निवर्त्तनीयः ॥ स्वर्णकटकादिदृष्टान्तेन पञ्चमभ्रमो निवर्त्तनीयः इति पञ्चभ्रमनिवर्त्तकाः दृष्टान्ताः पञ्च ॥ ब्रह्मणि जगद्भ्रान्त्या प्रतीयत इत्यत्र शुक्तौ रजतं रज्जौ सर्पः स्थाणौ पुरुषः गगने नीलतादि मरीचिकायां जलमिति दृष्टान्ताः पञ्च ॥ २१ ॥

ख्यातयः पञ्च विज्ञेया निपुणैः षट् समाधयः ॥
अरयः षट् समाख्याता षड्विकाराश्च भावजाः२२

आत्मख्यातिरसत्ख्यातिरन्यथाख्यातिरख्यातिरनिर्वचनीयख्यातिरिति पञ्च ख्यातयः ॥ आत्मख्यातिर्विज्ञानवादिनः ॥ असत्ख्यातिः शून्यवादिनः ॥ अख्यातिः सांख्यप्रभाकरयोः ॥ अन्यथाख्यातिर्भाट्टवैशेषिकयोः॥अनिर्वचनीयख्यातिर्वेदान्तिनः॥ दृश्यानुविद्धशब्दानुविद्धनिर्विकल्पकसमाधय एव बाह्याभ्यन्तरभेदेन षट् समाधयः ॥ दृश्या वृत्तयः । तासां द्रष्टाहमिति दृश्यानुविद्ध आभ्यन्तरः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

केवलमसङ्गोहमिति शब्दानुविद्ध आभ्यन्तरः ॥ तयोरस्फुरणं निर्विकल्पक आभ्यन्तरः ॥ सर्पादि द्रष्टाहमिति दृश्यानुविद्धो बाह्यः ॥ केवलमसङ्गोह मिति शब्दानुविद्धो बाह्यः॥ २उभयास्फुरणं निर्वि-कल्पको बाह्य इति विवेकः ॥ कामक्रोधलोभमो-हमदमात्सर्याणीत्ययः षट् जायन्ते ॥ अस्ति जायते वर्द्धते विपरिणमतेऽपक्षीयते विनश्यतीति षड्भाव-विकाराः ॥ २२ ॥

षडेव कौशिका देहे जराद्याश्च षडूर्मयः ॥
लिङ्गानि षड्विधान्यत्र षडवस्थाः प्रकीर्तिताः॥२३॥

त्वङ्मांसरुधिरमेदोमज्जास्थीनीति षट् कौशिकाः ॥ जरामरणक्षुत्पिपासाशोकमोहा इति षडूर्मयः ॥ उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् ॥ अर्थवादो पपत्तीच लिङ्गं तात्पर्यनिर्णय इति षड्विधलिङ्गानि ॥ प्रकरणेप्रतिपाद्यस्य तदाद्यन्तयोः प्रतिपादनमुपक्रमो पसंहारौ ॥ तन्मध्ये पुनःपुनः प्रतिपादनमभ्यासः ॥ उपनिषदेकगम्यत्वमपूर्वता ॥ आनन्दावाप्तिप्रतिपा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दनं फलम् ॥ स्तुतिनिन्दापरवाक्यमर्थवादः ॥ वाचारम्भणश्रुतिप्रतिपादिता युक्तिरुपपत्तिरिति विवेकः ॥ शिशुत्वबाल्ययौवनकौमारतारुण्यवार्द्धक यानीति षडवस्थाः ॥ २३ ॥

षट् शास्त्राणि च सूत्राणि षट् षडङ्गानि चैव हि ॥
कर्माणि षट् प्रमाणानि षट् शमादि च षड्विधम् २४॥

पूर्वमीमांसोत्तरमीमांसान्यायकाणादसांख्ययोगा इति षट् शास्त्राणि॥ आश्वलायनापस्तम्बबोधायनकात्यायनसत्याषाढवैखानसा इति षट् सूत्राणि॥शिक्षा कल्पव्याकरणनिरुक्तज्योतिश्छन्दांसीति षडङ्गानि। स्नानसन्ध्याजपहोमदेवतार्चनातिथ्यवैश्वदेवा इति षट् कर्माणि॥प्रत्यक्षानुमानोपमानशब्दानुपलब्ध्यर्थापत्तय इति षट् प्रमाणानि ॥ शमो दमः उपरतिस्तितिक्षा समाधानं श्रद्धेति शमादि षड्विधम् ॥२४॥

सप्तावस्थास्तथा ज्ञेयाश्चैतन्यानां च सप्तकम्॥
भूरादिसप्तकं तद्वत्सर्वपापविनाशकम् ॥ २५ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अज्ञानमावरणं विक्षेपः परोक्षमपरोक्षमनर्थनिवृत्ति रानन्दावाप्तिश्चेति सप्तावस्थाः॥ आवरणं द्विविधम्- असदावरणमभानावरणं चेति । नास्ति कूटस्थ इत्यसदावरणं न भाति कूटस्थ इन्यभानावरणम्॥ प-रोक्षज्ञानादसदावरणनिवृत्तिः॥अपरोक्षज्ञानादभाना वरणनिवृत्तिः।ततोविक्षेपनिवृत्तिः ॥ अतोनर्थनिवृत्ति रानन्दावाप्तिश्च भवतीति विवेकः ॥"शुद्धमीश्वरचैत न्यं जीवचैतन्यमेव च ॥ प्रमाता च प्रमाणं च प्रमेयं च फलं तथा ॥ इति सप्तविधं प्रोक्तं भिद्यते व्यवहा रतः" इति चैतन्यसप्तकम् ॥ " मायोपाधिविनि र्मुक्तं शुद्धमित्यभिधीयते ॥ मायासम्बन्धतश्चेशो जीवोऽविद्यावशस्तथा ॥ अन्तः करणसंबन्धात्प्रमाते त्यभिधीयते ॥ तथा तद्वृत्तिसम्बन्धात्प्रमाणमिति कथ्यते ॥ अज्ञातमपि चैतन्यं प्रमेयमिति कथ्यते ॥ तथा ज्ञातं हि चैतन्यं फलमित्यभिधीयते"इति विवे कः ॥ भूर्भुवःस्वर्महर्जनस्तपःसत्यमिति भूरादि सप्तकम् ॥ व्याहृतित्वाद्भूरादीनां पापविनाशकत्व मित्यर्थः ॥ २५ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सप्तकं चातलादीनां सप्तैव ज्ञानभूमिकाः ॥
पुर्य्यष्टकं समाख्यातमष्टौ प्रकृतयस्तथा ॥ २६ ॥

अतलवितलसुतलतलातलमहातलरसातलपातालानीत्यतलादिसप्तकम् ॥ "ज्ञानभूमिः शुभेच्छाख्या प्रथमा समुदाहृता ॥ विचारणा द्वितीया स्यात्तृतीया तनुमानसा ॥१॥सत्त्वापत्तिश्चतुर्थी स्यात्ततोऽसंशक्तिनामिका ॥ पदार्थाभाविनी षष्ठी सप्तमी तुर्यगा स्मृता"इति ज्ञानभूमिकाः सप्त ॥ भूमिका नाम चित्तस्यावस्थाविशेषः ॥ तत्र भूमित्रयं ब्रह्मविद्यासाधनमेव न तु ब्रह्मविद्याकोटावन्तर्भूतम् ॥ यश्चतुर्थभूमिकां प्राप्तः स ब्रह्मविदित्युच्यते ॥ पञ्चमभूमौ निर्विकल्पात्तदा स्वयमेव व्युत्तिष्ठति ॥ सोयं योगी ब्रह्मविद्वरः ॥ षष्ठभूमौ पार्श्वेस्थबोधितो व्युत्तिष्ठति । सोयं ब्रह्मविद्वरीयान् ॥ सप्तमभूमिकां प्राप्तो ब्रह्मविद्वरिष्ठः इत्युच्यत इति विवेकः॥ "१ज्ञानेन्द्रियाणि खलु पञ्च तथा २पराणि कर्मेन्द्रियाणि ३मनआदिचतुष्टयं च ४ ॥ प्राणादिपञ्चकम्५अथो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विदायदिकं च६कामश्च७कर्म च८तमः पुनरष्टधा पूः" इति पुर्य्यष्टकम् ॥ "भूमिरापोनलो वायुः खं मनो बुद्धिरेव च ॥ अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा" इत्यष्टौ प्रकृतयः ॥ २६ ॥

अङ्गान्यष्टौ समाधेश्च तथाष्टौ मैथुनस्य च ॥
संसारो नवधा ख्यातो देवता दश पञ्च च ॥२७॥

यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधय इत्यष्टावङ्गानि निर्विकल्पकसमाधेरिति केचित् ॥ अस्मिन्पक्षेऽङ्गघटकसमाधिशब्देन सविकल्पाख्याङ्गं संप्रज्ञातसमाधिरुच्यते ॥ संप्रज्ञातसमाधेरेतान्यष्टाङ्गानीति केचित् ॥ अस्मिन्पक्षेऽङ्गघटकसमाधिः संप्रज्ञाताद्भिन्न इत्यङ्गीकरणीयम्॥अङ्गाङ्गिनोर्भेदावश्यकत्वात् ॥ तथा विच्छिद्याविच्छिद्य प्रत्ययावृत्तिर्ध्यानम् ॥ सावधानेनाविच्छिद्याविच्छिद्य प्रत्ययावृतिरङ्गघटकः संप्रज्ञाताख्यसाधनसमाधिः ॥ निरवधितयाऽविच्छिद्य प्रत्ययावृत्तिरङ्गिस्वरूपसंप्रज्ञाताख्यसाध्यसमाधिरिति भेदः॥त्रयाणां

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विषयैक्येपि चित्तपरिपाकतारतम्यमङ्गी करणीयम्॥ करचरणादिसंस्थाविशेषलक्षणानि पद्मकस्वस्तिकादीन्यासनानि॥इन्द्रियाणां स्वस्वविषयेभ्यः प्रत्याहरणं प्रत्याहारः॥अद्वितीयवस्तुन्यन्तरिन्द्रियधारणं धारणा॥ "दर्शनं स्पर्शनं केलिः कीर्तनं गुह्यभाषणम्॥संकल्पो ध्यवसायश्च क्रियानिर्वृत्तिरेव च॥एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः ॥ विपरीतं ब्रह्मचर्यमनुष्ठेयं मुमुक्षुभिः"इत्यष्टावङ्गानि मैथुनस्य॥रागपूर्वकं रूपादिविषयकं ज्ञानं दर्शनम् ॥ तत्पूर्वकं क्रियादिविशेषजन्यं ज्ञानं स्पर्शनम्॥रागपूर्वकं परिहासादिव्यवहारः केलिः॥रूपादेरनुरागपूर्वकं सौन्दर्य्यादिवर्णनं कीर्तनम्॥रागपूर्वकं रहसि संभाषणं गुह्यभाषणम्॥रूपादिविषयको दृढेच्छाविशेषः इदमस्त्वित्येवंरूपः संकल्पः॥अनया रमे इति निश्चयोध्यवसायः॥रागपूर्वकं रूपादिविषयकानुभवविशेषः क्रियानिर्वृत्तिरिति विवेकः ॥ ज्ञाता ज्ञानं ज्ञेयं, भोक्ता भोग्यं भोगः, कर्त्ता करणं क्रियेति नवधा संसारः इत्येकः पक्षः ॥ महाभू

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तानि ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि प्राणादिपञ्चकं मनआदिचतुष्टयं स्थूलशरीरमेकं त्रिविधकर्माण्यवस्थात्रयमेतेषां कारणीभूतमज्ञानं चेति नवधा संसारः इत्यपरः पक्षः ॥ "दिग्वातार्कप्रचेतोश्विवह्नीन्द्रोपेन्द्रमृत्युकाः ॥ तथा चन्द्रश्चतुर्वक्त्रो रुद्रः क्षेत्रज्ञ ईश्वरः" इत्यधिष्ठातृदेवताः पञ्चदश ॥ २७ ॥

अस्थ्याद्या दश पञ्चैव रागाद्याः षोडशैव हि ॥
लिङ्गषोडशकं केचित्तथा सप्तदशात्मकम् ॥२८॥

अस्थिचर्मस्नायुमज्जामांसशुक्रशोणितश्लेष्माश्रुदूषिकाविण्मूत्रकफवातपित्तानीत्यस्थ्याद्याः पञ्चदश ॥ एतत्पञ्चदशसमुदायात्मकं स्थूलशरीरमिति ज्ञातव्यम् ॥ रागद्वेषकामक्रोधलोभमोहमदमात्सर्य्येर्ष्यासूयादम्भदर्पाहङ्कारेच्छाभक्तिश्रद्धा इति रागाद्याः षोडश ॥ एतेषां मध्येभक्तिश्रद्धे मुक्तिहेतू ॥ इच्छा तु मुक्तिहेतुर्बन्धहेतुश्च॥अन्ये बन्धहेतव इति विवेकः कर्मेन्द्रियपञ्चकं ज्ञानेन्द्रियपञ्चकं प्राणादिपञ्चकमन्तःकरणं चेतिषोडशकं लिङ्गमिति केचिद्वदन्तीत्यन्वयः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इदमेव सूक्ष्मशरीरमिति वेदितव्यम्॥ "पञ्चप्राणमनो बुद्धिदशेन्द्रियसमन्वितम् ॥ अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम्" इति सप्तदशात्मकं लिङ्गमित्यपि केचित् ॥ २८ ॥

केचिद्वदन्तित लिङ्गं नवाधिकदशात्मकम् ॥
चतुर्विंशतितात्वानि षट्त्रिंशत्सख्यकान्यपि २९

चित्ताहङ्काराभ्यां सहितं पूर्वोक्तं नवदशकं लिङ्गमित्यपि केचित् ॥ ज्ञानेन्द्रियपञ्चकं कर्मेन्द्रियपञ्चकं प्राणादिपञ्चकं शब्दादिपञ्चकं मनआदिचतुष्टयमित्येवं चतुर्विंशतितत्त्वानीति केचित् ॥ पञ्चीकृतभूतानि पञ्च शरीरत्रयमवस्थात्रयमज्ञानं च पूर्वोक्तैस्तत्त्वैः सह षट्त्रिंशत्तत्त्वानीति केचित् ॥ २९ ॥

आ षण्णवतितत्त्वानि प्रवदन्ति मनिषिणः ॥
अथो परमहंसानां संन्यासो द्विविधो मतः ।३०।

षड्भावविकाराः षडूर्मयः षट्कौशिकाः अरयः षट् जगत्त्रयं गुणत्रयं कर्मत्रयं वचनादिपञ्चकं संकल्पादि चतुष्टयं मैत्र्यादिचतुष्टयमज्ञानाधिष्ठातृदेवतारहिता

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दिगाद्यधिष्ठातृदेवताश्चतुर्दश पूर्वोक्तैस्तत्वैः सह षण्णवतितत्त्वानि प्राहुरित्यर्थः॥ विविदिषासंन्यासो विद्वत्संन्यासश्चेति परमहंससंन्यासो द्विविधः॥३०॥

तत्रापि द्विविधो विद्वत्संन्यासः परिकीर्तितः॥
निग्रहो द्विधो ज्ञेयोहङ्कारोपि द्विधा मतः ॥३१॥

विद्वत्सन्यासोपि जातरूपधरः कमण्डलुधारीति द्विविधः ॥ क्रमनिग्रहो हठनिग्रहश्चेति द्विविधो निग्रहः ॥ सामान्याहङ्कारो विशेषाहङ्कारश्चेत्यहङ्कारोपि द्विधा ॥ ३१ ॥

आनन्दास्त्रय एवात्र त्रिविधं कर्म चोच्यते ॥
जाग्रत्स्वप्नसुषुप्तानि प्रत्येकं त्रिविधानि वै ॥३२॥

ब्रह्मानन्दो विषयानन्दो वासनानन्दश्चेत्यानन्दास्त्रयः निजानन्दमुख्यानन्दात्मानन्दयोगानन्दाद्वैतानन्दानां ब्रह्मानन्देन्तर्भावः ॥ विद्यानन्दस्य विषयानन्देन्तर्भावः॥आगामि सञ्चितं प्रारब्धमिति त्रिविधं कर्म ॥ जन्मारभ्य मरणपर्यन्तकृतं पुण्यपापरूपं कर्मागामी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्युच्यते॥ जन्महेतुभूतत्वेन स्थितं पूर्वकृतं कर्म संचित मित्युच्यते॥शरीरारम्भकं कर्म प्रारब्धमिति भेदः ॥ जाग्रज्जाग्रज्जाग्रत्स्वप्नोजाग्रत्सुषुप्तिरिति जाग्रत्त्रिविधः॥ प्रमाज्ञानं जाग्रज्जाग्रत्॥शुक्तिरजतादिभ्रमो जाग्रत्स्वप्नः ॥ श्रमादिना स्तब्धीभावो जाग्रत्सुषुप्ति रित्यर्थः ॥ स्वप्नजाग्रत्स्वप्नस्वप्नः स्वप्नसुषुप्तिरिति स्वप्नस्त्रिविधः ॥ स्वप्नेमंत्रादिप्राप्तिः स्वप्नजाग्रत् ॥ स्वप्नेपि स्वप्नो मया दृष्ट इति बुद्धिः स्वप्नस्वप्नः ॥ जाग्रद्दशायां कथयितुं शक्यते स्वप्नावस्थायां च यत्किञ्चिदनुभूयते तत्स्वप्नसुषुप्तिरित्यर्थः ॥ सुषुप्तिजाग्रत्सुषुप्तिस्वप्नः सुषुप्तिसुषुप्तिरिति सुषुप्तं त्रिविधम्॥ सुषुप्त्यवस्थायामपि सात्त्विकी या सुखाकारा वृत्तिः सा सुषुप्तिजाग्रत् ॥ तदनन्तरं सुखमहमस्वाप्समिति परामर्शात्तत्रैव या राजसी वृत्तिः सा सुषुप्तिस्वप्नः ॥ तदनन्तरं दुःखमहमस्वाप्समिति परामर्शात्तत्रैव या तामसी वृत्तिः सा सुषुप्तिसुषुप्तिः॥ तदनन्तरं गाढं मूढोहमासमिति परामर्शादित्यर्थः ॥ ३२ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आत्मत्रयं च विज्ञेयं सन्यासस्तु चतुर्विधः ॥
चतस्रो भूमिका ज्ञेयाश्चतस्रो युक्तयस्तथा॥३३॥

ज्ञानात्मा महानात्मा शान्तात्मा चेत्यात्मत्रयम् ॥ कुटीचको बहूदको हंसः परमहंसश्चेति संन्यासश्चतुर्विधः ॥ तत्त्वविदोपि क्लेशक्षयायास्त्येवासंप्रज्ञातसमाध्यपेक्षा॥ तस्य चासंप्रज्ञातसमाधेर्गवाश्वादिष्विव वाङ्निरोधः प्रथमाभूमिः॥बालमूकादिष्विव निर्ममत्वं द्वितीया।तन्द्रायामिवाहङ्काराराहित्यं तृतीया।सुषुप्ताविव महत्तत्त्वराहित्यंचतुर्थभूमिकेति भूमिकाश्चतस्रः एतदभिप्रेत्य शनैरुपरमेदित्युक्तं भगवता ॥"आध्यात्मविद्याधिगमः साधुसङ्गम एव च ॥ वासनासंपरित्यागः प्राणस्पन्दनिरोधनम्" इति युक्तयश्चतस्रः ॥ चित्तक्षये युक्तिरेकैव साधनमिति ॥ अतः पूर्वस्मादार्ढ्याभावे उत्तरसाधनेऽप्रवृत्तिरिति विज्ञेयम् ॥३३॥

भिक्षवः षडजिह्वाद्या मौनाद्याः सप्तधा मताः ॥
नाडिकादशकं नाडीदेवता दश कीर्तिताः ३४॥

"अजिह्वः षण्डकः पङ्गुरन्धो बधिर एव च॥मुग्धश्च मुच्यते भिक्षुः षड्भिरेतैर्न संशयः" इति भिक्षवः षट्॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

"इदमिष्टमिदं नेति योश्नन्नपि न सज्जते ॥ हितं सत्यं मितं वक्ति तमजिह्वं प्रचक्षते" ॥ १ ॥ "अद्य जातां यथा नारीं तथा षोडशवार्षिकीम् ॥ शतवर्षां च यो दृष्ट्वा निर्विकारः स षण्डकः"॥ २ ॥"भिक्षार्थमटनं यस्य विण्मूत्रकरणाय च॥योजनान्नपरं याति सर्वथा पङ्गुरेव सः"॥३॥"तिष्ठतो व्रजतो वापि यस्य चक्षुर्न दूरगम् ॥ चतुर्युगां भुवं मुक्त्वा परिव्राट् सोन्ध उच्यते"॥ ४ ॥ "हिताहितं मनोरामं वचः शोकावहं च यत् ॥ श्रुत्वापि यो नो शृणोति बधिरः स प्रकीर्तितः"॥५॥"सान्निध्ये विषयाणां च समर्थोऽविकलेन्द्रियः ॥सुप्तवद्वर्त्तते नित्यं स भिक्षुर्मुग्ध उच्यते"॥६॥ इत्यर्थः॥"मौनं योगासनं योगस्तितिक्षैकान्तशीलता॥ निःस्पृहत्वं समत्वं च सप्तैतान्येकदण्डिनः" इति मौनाद्याः सप्तधा मताः॥संमता इत्यर्थः॥"इडा च पिङ्गला चैव सुषुम्णा च ततः परम् ॥ गान्धारी हस्तिजिह्वा च पूषा चैव पयस्विनी॥१॥लकुहाऽलम्बुसा चैव शङ्खिनी दश नाडिकाः" इति नाडीदशकम्॥इडा चन्द्रनाडी२ पिङ्गला सूर्य्यनाडी ॥सुषुम्णा मध्यनाडी ॥ गान्धारी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दक्षिणनेत्रिका ॥हस्तिजिह्वा वामनेत्रिका॥पूषा दक्षिणकर्णिका ॥ पयस्विनी वामकर्णिका ॥ लकुहा गुह्यनाडी॥ अलम्बुसा मेढ्रनाडी॥ शङ्खिनी नाभिनाडीति विवेकः ॥ हरिब्रह्मरुद्रेन्द्रवरुणेशपद्मोद्भवपृथिवीसूर्यचन्द्रा इति क्रमान्नाडीनां दश देवताः ॥ ३४ ॥

अन्तरङ्गमदाश्चाष्टौ षट् संख्याका बहिर्मदाः ॥
अष्टमूर्तिमदाः ख्याताः पाशाश्चाष्टौ प्रकीर्तिताः ॥ ३५ ॥

धनिनी स्थितिनी कृतिनी वर्त्तिनी क्रोधिनी मोहिन्यतिचारिणी वाहिनीत्यष्टान्तरङ्गमदाः॥कुलंशीलं धनं चैव रूपं यौवनमेव च॥विद्या राज्यं तपश्चैवमित्येते षड् बहिर्मदाः" इति षड् बहिर्मदाः॥पृथिवी सलिलं पावकः शशी पवनोम्बरं रविरात्मेत्यष्टमूर्त्तिमदाः॥ पृथिवीमदाविर्भावे जीवस्तमोगुणभरितो वस्त्रादीच्छावान्भवति ॥ सलिलमदाविर्भावे संसारभरितो ममेदमावश्यकमिति चिन्तायुक्तो भवति ॥ पावकमदाविर्भावे कामभरितो वनितासंभोगे-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

च्छया तदनुकूलव्यापारवान्भवति ॥ शशिमदाविर्भावे चिन्ताभरितः करिष्यमाणकार्यं भविष्यति वा कृतं चेदन्यथा भविष्यति वेति संशयात्तूष्णीं स्थितो भवति क्षणमात्रम् ॥ पवनमदाविर्भावे प्रयाणभरितः परदेशगमनेच्छावान्भवति ॥ आकाशदाविर्भावे वाहनभरितो गजाश्वादीच्छावान्भवति ॥ सूर्यमदाविर्भावे क्रोधाग्निभरित इदं संहर्त्तव्यमितीच्छावान्भवति॥ आत्ममदाविर्भावेहङ्कारभरितो विद्यादिभिर्ममसमः को वेति प्रज्ञावान्भवतीति विवेकः ॥ "घृणा शङ्का भयं लज्जा जुगुप्सा चेति पञ्चकम् ॥ कुलं शीलं च वित्तं चेत्यष्टौ पाशाः प्रकीर्तिताः" इत्यष्टौ पाशाः ॥ ३५ ॥

धातवः सप्त विज्ञेयाः सप्तैव व्यसनानि वै ॥
षड् भ्रमाः पञ्च वै क्लेशास्तापोप्याध्यात्मिको द्विधा ॥ ३६ ॥

"रसो रुधिरमांसे च मेदो मज्जास्थिरेतसी ॥ धातवः सप्त विज्ञेयाः सर्वदेहसमाश्रयाः" इति सप्त धातवः ॥ भुक्तमन्नं रसात्मतया परिणतं सद्रस इत्यु-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

च्यते ॥ एवं सर्वत्र रुधिरादिषु रुधिरात्मकतयेत्या-
दि विज्ञेयम् ॥ तनुव्यसनमनोव्यसनधनव्यसनराज्य-
व्यसनविश्वव्यसनोत्साहव्यसनसेवकव्यसनानीति
सप्त व्यसनानि ॥ तनुव्यसनोद्गमे शरीरं कृशं
जातमिति जीवः खिन्नो भवति ॥ मनोव्यसनोद्गमे
चौर्यपरीक्षादिमान्भवति ॥ विश्वव्यसनोद्गमे गृहक्षे-
त्रादिसंपादनेच्छावान्भवति ॥ उत्साहव्यसनोद्गमे
पुत्रकलत्रादीच्छावान्भवति ॥ सेवकव्यसनोद्गमे
परराष्ट्रगमनादिसक लधर्मपोषणरतो भवति ॥ शेषं
स्पष्टार्थम् ॥ कुलगोत्रजातिवर्णाश्रमनामभेदेन षड्
भ्रमाः ॥ मालवकर्णाटकद्राविडभेदाभिमानव्यव-
हारः कुलभ्रमः ॥ विश्वामित्रादिव्यवहारो गोत्र-
भ्रमः ॥ ब्रह्मक्षत्रवैश्यशूद्राभिमानव्यवहारो जा-
तिभ्रमः ॥ अष्टादशवर्णेष्वहं श्रेष्ठ इत्यभिमानव्यव-
हारो वर्णभ्रमः ॥ शेषं स्फुटम् ॥ अविद्यास्मितारा-
गद्वेषाभिनिवेशाः पञ्च क्लेशाः ॥ अथवाऽविद्या-
स्मितासूयास्पर्द्धाभिनिवेशाः पञ्च क्लेशाः ॥ मलादि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वेष्टितस्थूलशरीरमेवाहमित्यभिमानोऽविद्या ॥ तापत्रयानुभवएवाऽस्मिता ॥ रागादिभिः परिभवानुभव एवाऽसूया ॥ सज्जनदर्शने द्वेषबुद्ध्या निषेधएव स्पर्द्धा ॥ लोकरञ्जनाय तदुचितकर्मोद्योगवेषादिधारणाऽभिनिवेश इति विवेकः ॥ मानसतापः शारीरताप इत्याध्यात्मिकतापो द्विधा ॥ ज्वरगुल्मशूलादिदोषसंपादिततापः शारीर तापः॥असूयादिसंपादितचित्तव्याकुलतैव मानसताप इत्यर्थः॥३६॥

क्षयादयस्त्रयस्तापाः गुणा वै पञ्चसप्ततिः ॥
रूपषट्कं च विज्ञेयं स्पर्शः प्रोक्तश्चतुर्विधः ॥ ३७ ॥

स्वर्गलोके क्षयादितापास्त्रयः ॥ क्षयतापः अतिशयतापः साहसपतनताप इति तापाःस्वर्गे त्रयःइत्यर्थः यथा स्वार्ज्जितधनक्षयेण मनोविचारात्मकतापः तथा पुण्यकर्मक्षये पुनः पतनभीतिजन्यताप एव क्षयतापः॥ स्वर्गलोकगमनसमये स्वाधिकतरं देवतास्थापितलोकदर्शनमेवातिशयतापः ॥ पुण्यकर्मक्षयानन्तरं तत्रत्यसुरकोटिभिर्मुद्गरमुशलप्रहरणेन कम्पितसर्वाङ्गप-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तनं स्वर्गलोके साहसपतनताप इति बोध्यम् ॥ "अस्थिमांसत्वचा नाडी रोम चैवतु पञ्चकम् ॥ पञ्च क्षितिगुणाः प्रोक्तास्तथैवांशाः प्रकीर्त्तिताः ॥ १ ॥ श्लेष्मा मूत्रं तथा स्वेद शुक्रं शोणितमेव च ॥ अपां पञ्च गुणाः प्रोक्तास्तथैवांशाः प्रकीर्त्तिताः ॥ २ ॥ क्षुधा तृषा तथा निद्रा ह्यालस्यं सङ्ग एव च ॥ अग्नेः पञ्च गुणाः प्रोक्तास्तथैवांशाः प्रकीर्त्तिताः ॥ ३ ॥ धावनं चलनं चैवाकुञ्चनं च प्रसारणम् ॥ वियोगश्चेति विज्ञेयं वायोः पञ्च गुणा इति ॥ ४ ॥ रागद्वेषौ भयं लज्जा मोहश्च नभसस्तथा ॥ इति पञ्चगुणाः प्रोक्तास्तथैवांशाः प्रकीर्त्तिताः ॥ ५ ॥ इति ॥ तथा च पृथिव्याः शब्दस्पर्शरूपरसगन्धात्मकपञ्चगुणकत्वेनशब्दादिपञ्चगुणसम्बन्धवत्यां पृथिव्यां पञ्चविंशतिर्गुणाः प्राप्ताः ॥ एकैकस्य शब्दगुणादेःश्लोकोक्तपञ्चविशेषगुणकत्वकथनात् ॥ तथा चापां विंशतिर्गुणाः अग्नेः पञ्चदश गुणाः, वायोर्दश गुणाः, आकाशस्य पञ्च गुणा इति पञ्चसप्ततिर्गुणाः सुधीभिर्विभावनी-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

धाः॥श्वेतपीतहरितरक्तकृष्णमाञ्जिष्ठभेदेन रूपषट्कम्॥ शीतोष्णमृदुकाठिन्यभेदेन स्पर्शश्चतुर्विधः ॥ ३७॥

शब्दो द्विधा रसाः षड्वै गन्धोत्र द्विविधो मतः ॥
वर्णा नवैव विख्याता ऐश्वर्य्याद्याः षडेव हि३८

अक्षरानक्षरभेदेन शब्दो द्विधा ॥ मधुराम्लतिक्त कटुकषायलवणभेदेन रसाः षट् ॥ सुगन्धदुर्गन्ध भेदेन गन्धो द्विविधः ॥ प्राण इन्द्रनीलवर्णः, अपानो हरितवर्णः, व्यानः कपिलवर्णः, उदानस्त डिद्वर्णः, समानो नीलवर्णः, नागः पीतवर्णः, कूर्मः श्वेतवर्णः, कृकलः अञ्जनवर्णः, देवदत्तः स्फटिकवर्णः ॥ धनञ्जय इन्द्रनीलवर्ण इत्याहत्य नव वर्णाः ॥"ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः॥ज्ञानवैराग्ययोश्चैव षण्णांभग इतीङ्गना" इत्यै-श्वर्य्याद्याः षट् ॥ ३८ ॥

षडुत्पत्त्यादयो ज्ञेया नादाद्यास्त्रय एव हि ॥
वेदान्तस्य पदार्थानामेवं संज्ञाः प्रकीर्त्तिताः ३९

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इति श्रीवेदसंज्ञाख्यः प्रबन्धोयं मया कृतः॥
अनेन प्रीयतां श्रीमद्दक्षिणामूर्तिरीश्वरः॥४०॥
इति श्रीमन्मिश्रकृष्णदत्तसमाधीतविद्यादि-
त्यपुरीविरचितं श्लोकबद्धं संज्ञाप्रकर-
णं समाप्तम्॥ शिवं भूयात्॥

"उत्पत्तिं निधनं चैव भूतानामागतिं गतिम् ॥ वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति" इत्युत्पत्त्यादयः षट्॥ नादबिन्दुकला इति नादाद्यास्त्रयः॥ संवृते गलविवरे यत्कण्ठे निनादकरणं स नादः॥ अनुस्वारो बिन्दुः नादैकदेशः कलेत्यर्थः॥ एवमुक्तेन प्रकारेण वेदान्तस्योपनिषदः पदार्थानामध्यारोपमाश्रित्य संज्ञाः प्रतिपादिता इत्यर्थः॥ ३९॥ ४०॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यहरचर-
णपुरीशिष्यादित्यपुरीविरचिता श्लोक
बद्धवेदान्तसंज्ञाव्याख्या प्रदीपिका
समाप्तिमगमत्॥ शिवं भूयात्॥

ॐ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विक्रयार्थमस्मत्प्रकाशितपुस्तकानां सूची.

पूर्वमीमांसादर्शनम्. (सविषयाधिकरणम्) .... ०—१२—०

न्यायदर्शनं टिप्पणसहितम्. (विषयानुक्रमयुतम्) .... ०—२—०

वैशेषिकदर्शनम्. (विषयानुक्रमयुतम्) ०—३—०

(बृहत्) सांख्यदर्शनम् }
(लघु)सांख्यदर्शनम् } ०—२—०

पातञ्जलयोगदर्शनम् .... ०—१—०

वेदन्तदर्शनम् (मतांतरीयपाठान्तरसहितम्) ०-२-०

षड्दर्शनानि ,, ... १—६—०

पञ्चीकरणं(श्रीमच्छङ्कराचार्यविरचितम्) श्रीमत्सुरेश्वराचार्यकृतवार्तिकयुतंराम-तीर्थप्रणीतचंद्रिकाख्यटीकासंवलितश्रीमदानन्दगिरिग्रथितविवरणसमेतम् ....०—६—०

षट्चक्रनिरूपणं सटीकम् (योगशास्त्रम्)०—८—०

एतानि तथान्यानि पुस्तकानि झवेरवाटिकायां पुस्तकालये नं ३५० तमाङ्काङ्कितेप्राप्यन्ते सं.१९५८

ज्येष्ठाराम मुकुन्दजी मुंबई.

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri